रामदशकम्

हे राम जलदश्याम स्वामिन्निर्दोष पूरुष ।
भीमतामसयोनीनां मामा मुञ्च तवानुगान् ॥ १॥

उपकृत्यै सज्जनानामपकृत्यै तथाऽसताम् ।
नमतामंहसो हत्यै भूत्यै सर्वदिवौकसाम् ॥ २॥

भीत्यै खरादिदैत्यानां प्रीत्यै च वनवासिनाम् ।
स्वस्यापि महिमोन्नत्यै नीत्यै चारण्यचारिणौ ॥ ३॥

ब्रह्मरुद्रादिभिर्देवैरर्चितौ श्रुतिचर्चितौ ।
ज्ञानानन्दमयौ ध्यातृप्रियौ सर्वगुणाश्रयौ ॥ ४॥

ध्वजवज्राङ्कुशाम्भोजराजितौ राजपूजितौ ।
रक्तपद्मोपमौ ध्वस्तश्रमौ विद्रावितभ्रमौ ॥ ५॥

नारीकृतशिलौ रम्यतळौ दिव्याङ्गुलीदलौ ।
वृत्तमौक्तिकसङ्काशनखौ त्रिजगतीसुखौ ॥ ६॥

विचित्रभूषणोपेतौ भीषणौ त्यक्तदूषणौ ।
लक्ष्मीधराकराम्भोजसेवितौ सिद्धभावितौ ॥ ७॥

अनन्तवैदिकपदास्पदौ स्वजनसम्पदौ ।
अजाण्डभङ्गनौ धूताङ्गनौ भुवनरङ्गनौ ॥ ८॥

क्ष्माभारहारिणौ मुक्तिकारिणौ भववैरिणौ ।

पार्थदत्तधनौ युक्तयाऽपार्थिंकृतसुयोधनौ ॥ ९ ॥

तेवनौत्सुक्यतो भूमिपावनौ प्रणतावनौ ।
सीताभिरामौ श्रीरामचरणौ शरणं मम ॥ १० ॥

इमानि दश पद्यानि श्रमापहृतये सताम् ।
यतिना वादिराजेन कृतिना रचितानि वै ॥ ११ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

श्रीरामदशकं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु